"ऋचेभिः ऋजुगामिभिः"। इति भाष्यम्"।)

ऋञ्जसानः, पुं, (ऋजि+"ऋञ्जिवृधिमन्दिसहिभ्यः किन्"। २। ८७। इत्युणादिसूत्रेण असानच्। किच्च।) मेघः। इति सिद्धान्तकौमुदी ॥ उणादिकोषश्च ॥)

ऋण, द उ ज गतौ। इति कविकल्पद्रुमः। (तनां-उभं-सकं-सेट्।) द ज ऋणोति अर्णोति ऋणुते अर्णुते। उ अर्णित्वा ऋत्वा। इति दुर्गादासः ॥

ऋणं, क्ली, (ऋ+क्त। ऋणमाधमर्ण्ये इति नत्वम्।) धारः। देना इति भाषा। तत्पर्य्यायः। पर्य्युदञ्चनम् २ उद्धारः ३। इत्यमरः॥ पुनर्देयत्वेन स्वीकृत्य यत् गृहीतम्। इति जगदीशः॥ अस्य विवरणं ऋणादानशब्दे द्रष्टव्यम् ॥ * ॥ कुसीदाख्यं ऋणं यथा।

"स्थानलाभनिमित्तं यद्दानग्रहणमिष्यते।
तत्कुसीदमिति ज्ञेयं तेन वृत्तिः कुसीदिनाम्" ॥

इति नारदः॥ अस्यार्थः। स्थानं मूलधनावस्थानम्। लाभो वृद्धिः। दानग्रहणपदे कर्म्मण्यनटा साध्ये तेन मूलधनावस्थाने सत्येव यो लाभस्तदर्थं यद्दानं धनिकेन दीयमानं मूलधनं अधमर्णेन च ग्रहणं तथा स्वीकृत्य गृह्यमाणं यत्तद्धनम्। इति रत्नाकरादयः॥ कल्पतरौ तु अवस्थापाकरणीयत्वरूपगुणयोगाद्गौणप्रयोगः। अतएव वार्द्धुष्यार्थप्रयुक्तस्य गर्हितं इति मिश्राः॥ * ॥ अपि च।

"कुत्सितात् सीदतश्चैव निर्व्विशङ्कैः प्रगृह्यते।
चतुर्गुणं वाष्टगुणं कुसीदाख्यमतः स्मृतम्" ॥

इति वृहस्पतिः॥ अस्यार्थः। कुत्सितात् सीदतः अधमर्णात् सकलं धनं यत् गृह्यते निर्व्विशङ्कैरुत्तमर्णैः। चतुर्गुणं वेति वाकारोऽनाख्यायां तेन द्वैगुण्यादिलाभः। * । ऋणत्रयविशेषो यथा।

"देवानाञ्च पितॄणाञ्च ऋषीणाञ्च तथा नरः।
ऋणवान् जायते यस्मात्तन्मोक्षे प्रयतेत् सदा ॥*॥

तत्परिशोधनमाह।

"देवानामनृणो जन्तुर्यज्ञैर्भवति मानवः।
अल्पवित्तश्च पूजाभिरुपवासव्रतैस्तथा ॥
श्राद्धेन प्रजया चैव पितॄणामनृणो भवेत्।
ऋषीणां ब्रह्मचर्य्येण श्रुतेन तपसा तथा" ॥

इति विष्णुधर्म्मोत्तरम्॥ (जलदुर्गमभूमिः। यथा मुग्धबोधे १। २८ सूत्रस्य टीकायां दुर्गादासः।

"दशार्णो देशः दशार्णा नदी उभयत्र ऋणशब्देन जलदुर्गमभूमिरुच्यते" ॥ अङ्कशास्त्रोक्तः कुतश्चिदपि राश्यन्तरात् वियोज्य संख्यावान् पदार्थः। यथा वीजगणिते।

"धनर्णसङ्कलने करणसूत्रं वृत्तार्द्धम्।
योगे युतिः स्यात् क्षययोः स्वयोर्वा
धनर्णयोरन्तरमेव योगः" ॥

ऋणतीति। ऋण गतौ तस्मात् क्तः। इति व्युत्पत्त्या वाच्यलिङ्गः। गन्ता। गमनशीलः। यथा, ऋग्वेदे ६।१२।५। "सद्यो यः स्पन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट्"। "ऋणः शीघ्रगन्ता" इति भाष्यम् ॥)

ऋणमल्लकः, पुं, (ऋणे मल्ल इव।) लमकः। इति शब्दरत्नावली ॥ जामिन इति भाषा ॥

ऋणमार्गणः, पुं, (ऋणं मार्गयति यः सः। ऋण+मार्ग+ल्यु।) प्रतिभूः। इति हारावली ॥ जामिन इति भाषा ॥

ऋणमुक्तिः, स्त्री, (ऋणस्य ऋणात् वा मुक्तिर्मोचनं भवत्यस्मात्।) ऋणपरिशोधनम्। तत्पर्य्यायः। विगणनम् २। इति त्रिकाण्डशेषः॥

ऋणमोक्षः, पुं, (ऋणात् मोक्षः।) ऋणपरिशोधनम्। इति हारावली ॥

ऋणादानं, क्ली, (ऋणस्य आदानम् ग्रहणम्।) अधमर्णात् उत्तमर्णेन स्वधनग्रहणम्। तत्तु अष्टादशविवादान्तर्गताद्यविवादः। (यदाह मनुः। ८।४। "तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः"। इत्यादि।) तच्च सप्तविधं यथा। ईदृशमृणं देयम् १ ईदृशमदेयम् २ अनेनाधिकारिणा देयम् ३ अस्मिन् समये देयं ४ अनेन प्रकारेण देयं ५ इत्यधमर्णे पञ्चविधम्। उत्तमर्णे तु दानविधिः ६ आदानविधिश्च ७ इति द्विविधम्। तथाच नारदः।

"ऋणन्देयमदेयञ्च येन यत्र यथा भवेत्।
दानग्रहणधर्म्माश्च ऋणादानमिति स्मृतम्" ॥

अदेयमिति यदुक्तं तदाह कात्यायनः।

न स्त्रीभ्यो दासबालेभ्यः प्रदद्यात् किञ्चिदुद्धृतम्।
दाता न लभते तत्तु तेभ्यो दत्तन्तु यद्वसु" ॥

तत्र विशेषमाह वृहस्पतिः।

"परिपूर्णं गृहीत्वाधिं बन्धं वा साधुलग्नकम्।
लेख्यारूढ़ं साक्षिमद्वा ऋणं दद्यात् धनी सदा" ॥

इति विवादार्णवसेतुः॥ अस्य यदवशिष्टं ऋणोद्ग्राहणशब्दे द्रष्टव्यम् ॥

ऋणान्तकः, पुं, (ऋणमन्तयति यः। ऋण+अन्ति नामधातु+ण्वुल्। मङ्गलग्रहाराधनेन ऋणापनयनात् तथात्वम्।) मङ्गलग्रहः। इति शब्दरत्नावली ॥

ऋणापनोदनं, क्ली, (ऋण+अप+नुद+ल्युट्। ततः षष्ठीतत्पुरुषः।) ऋणापनयनम्। धारशोधनम् ॥

ऋणी, [न्] त्रि, (ऋणमस्यास्तीति। ऋण+इनि।) ऋणग्रस्तः। धारी ॥ ("जायमानो वै ब्राह्मणः त्रिभिर्ऋणैर्ऋणी भवति"। इति श्रुतिः। "ऋणी न स्यात् यथा पिता"। इति दायभागे ॥)

ऋणोद्ग्राहणं, क्ली, (ऋणस्य उद्ग्राहणं।) अधमर्णगृहीतर्णग्रहणं। यत्र ऋणं प्रार्थनकाले प्रार्थितोऽपि ऋणी न ददाति तत्र धनिकेन यत् कर्त्तव्यं तदाह मनुः। ८।४८—४९।

"यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।
तैस्तैरुपायैः संगृह्य साधयेदधमर्णिकम्" ॥
धर्म्मेण व्यवहारेण छलेनाचरितेन च।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" ॥

अयमर्थः। पूर्व्वपूर्व्वसामर्थ्याभावे उत्तरोत्तरम् संगृह्य वशीकृत्य। धर्म्मे वृहस्पतिराह।

"सुहृत्सम्बन्धिसन्दिष्टैः सामोक्त्यानुगमेन च।
प्रायेण वा ऋणी दाप्यो धर्म्म एष उदाहृतः" ॥

अस्यार्थः। ऋणिकस्य ये सुहृत्सम्बन्धिनस्तैः सन्देशो यो यत्र सामवचनं यत्रानुगमनं प्रायोपवेशनं वा धनिकस्य सधर्म्मः ऋणोद्ग्राहणोपायः॥ व्यवहारे कात्यायनः।

"धार्य्योऽवरुद्ध ऋणिकः प्रकाश्यं जनसंसदि।
यावन्न दद्याद्देयञ्च देशाचारस्थितिर्यथा" ॥

अस्यार्थः। यावद्दानं जनसंसदि ऋणिकस्य धनिकेन धारणं व्यवहारः॥ छलाचरितबलात्कारेषु वृहस्पतिः।

"छद्मना याचयित्वार्थमानीय ऋणिकाद्धनी।
अन्वाहितादि वाहृत्य दाप्यते यत्र सोपधिः" ॥

अस्यार्थः। ऋणिकस्य धनमन्वाहितादि वा छद्मना आहृत्य वा यत्र दाप्यते तत्र साधनोपायः सोपधिः सच्छलमुच्यते ॥

"पुत्त्रदारपशून् बद्धा कृत्वा द्वारोपवेशनम्।
यत्रर्णी दाप्यतेऽर्थं स्वं तदाचरितमुच्यते ॥
बद्धा स्वगृहमानीय ताड़नाद्यैरुपक्रमैः।
ऋणिको दाप्यते यत्र बलात्कारः स उच्यते" ॥

अनयोरर्थः। पुत्त्रदारपश्वरोधो द्वारोपवेशनञ्च य उद्ग्राहणोपायस्तदाचरितमुच्यते। स्वगृहमानीय ताड़नादिलक्षण उद्ग्राहणोपायो बलात्कार उच्यते॥ * ॥ कोऽधमर्णः केनोपायेन साध्यस्तदाह कात्यायनः।

"राजानं स्वामिनं विप्रं सान्त्वेनैव प्रसाधयेत्।
ऋक्थिनं दुर्हृदं वापि छलेनैव प्रसाधयेत्" ॥

ऋक्थिनं दायादम्॥ तथा

"वणिजः कर्षकांश्चैव शिल्पिनश्चाब्रवीद् भृगुः।
देशाचारेण दाप्याः स्युर्दुष्टान् संपीड्य दापयेत् ॥*॥

यत्र धनं न लभ्यते तत्राह वृहस्पतिः।

"निर्धनं ऋणिकं कर्म्म गृहमानीय कारयेत्।
शौण्डिकाद्यं ब्राह्मणस्तु दापनीयः शनैः शनैः" ॥

याज्ञवल्क्यः,—

"हीनजातिं परिक्षीणमृणार्थं कर्म्म कारयेत्।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम् ॥

यथोदयं यथा धनोत्पत्तिरित्यर्थः॥ * ॥ व्यापारद्वारा न ब्राह्मणस्य ऋणशोधनमाह कात्यायनः।

"कर्म्मणा चासविट्शूद्रान् समहीनांस्तु दापयेत्"॥•

ऋणशोधनाय निन्दितं कर्म्म कारयितुरुत्तमर्णस्य दण्डमाह कात्यायनः।

"यदि छादावगादिष्टमशुभं कर्म्म कारयेत्।
प्राप्नुयात् साहसं पूर्व्वमृणान्मुच्येत चर्णिकः ॥ * ।

यदि परमवृद्धिप्राप्तं धनमृणिको दातुं न शक्नोति तदा चक्रवृद्ध्या लेख्यया धारयेत्। यथा वृहस्पतिः।

"पूर्णावधौ शान्तलाभमृणमुद्ग्राहयेद्धनी।
कारयेद्वा धनी लेख्यं चक्रवृद्धिव्यवस्थया" ॥

तथा च वृहस्पतिः।

"हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके।
द्रव्यं तदीयं संगृह्य विक्रीणीत सलाक्षिकम् ॥
रक्षेद्वा कृतमूल्यन्तु दशाहं जनसंसदि।
ऋणानुरूपं परतो गृहीतार्थन्तु वर्जयेत् ॥
स्वधनञ्च स्थिरीकृत्य गणनाकुशलैर्नरैः।
तद्बन्धुज्ञातिविदितं शेषं ज्ञापराभुयात्" ॥*॥

यथाविषयं धर्म्मादीन् धनसाधनोपायान् प्रयुञ्जानो